वर्ष-०९, जूलाइ-डिसेम्बर-२०१५
अङ्कौ-६४-६५ (संयुक्ताङ्कौ)

ISSN 2321-1342
वार्षिक रु-१५०

# देवसायुज्यम्

संस्कृत-त्रैमासिक-पत्रिका,

सम्पादकः
डॉ.प्रफुल्लः पुरोहितः



पञ्चमी राष्ट्रियसंस्कृतपत्रकारसङ्गोष्ठ्याः चित्राणि ।

संपादक : डॉ. प्रफुल्ल पुरोहितः

## परामर्शकमण्डलम्

डॉ. जयन्तीलाल के. भट्टः
प्रो. राजेन्द्र नाणावटी
प्रो. उमा देशपांडे
प्रो. जयदेव ए. जानी
श्रीहंसकुमार मांकड
डॉ. रमणलाल पाठक



| प्रकाशकः | मुद्रक |
|---|---|
| डॉ. प्रफुल्ल पुरोहितः | Disha Art |
| एल-२, न्यू विकक्रम बाग, लेकचरर्स कवार्टर्स, ह | New Sama Road, Vadodara-390 024 |
| एम.एस.यु. प्रतापगंज, वडोदरा-२. मो. ९३७६२१९४७७ | M : 9925382863 |



## अनुक्रमणिका



| | | |
|---|---|---|
| १. मन्त्रः | | २ |
| २. मृत्योः आत्महत्या | सतीशः गज्जर् | ३ |
| ३. संक्षिप्त वाल्मीकीय रामायणम् अयोध्याकाण्डम् रामस्य वनगमनम् । | श्रीरसिकभाई बी.परीख | ४ |
| ४. वैदिकं पर्यावरणविषयकचिन्तनम् | प्रो.डॉ.योगिनी हिमांशु व्यास | ७ |
| ५. आतङ्कवादः एवं विश्वशान्तिः॥ | डॉ.ललितः पटेलः | ९ |
| ६. ऋषि-मुनिपदार्थप्रतीतिः | डॉ.अमृतलालः भोगायता | १२ |
| ७. श्रीमद्भगवद्गीतायां निर्दिष्टो छात्रोपदेशः। | प्रा.डो.एन.एस.शुक्ल | १३ |
| ८. संस्कृतसाहित्ये पद्य-काव्यम् | अमीषा हर्षदभाई दवे | १८ |
| ९. धन्यं करोतु जीवनम् | प्रो. (डा.) सुदेशः गौतमः | २० |
| १०. श्रीसोमनाथसंस्कृतविश्व-विद्यालयस्य पञ्चकम् | शुक्ल जितेशःएम | २१ |
| ११. रसमीमांसासप्तकम् | हार्दिकः एम गोहिलः | २१ |
| १२. यशोधरामहाकाव्ये सौन्दर्य चर्चा । | डॉ.प्रफुल्लः पुरोहितः | २२ |
| १३. शब्दशक्तेऽभिधा | प्रियांका मण्डलः | २५ |
| १४. देववाणी-परिषदः चत्वारिशत्तमः स्थापनादिवससमारोहः आयोज्यत - विज्ञापयिता - | ऋषिराजपाठकः | ३० |
| १५. बूँदी-नगर्यां राष्ट्रियसङ्गोष्ठी सम्पन्ना | | ३१ |
| १६. भारतीयसंस्कृतपत्रकारसंघस्य नूतनकार्यकारिण्याः संघटनम् । | | ३१ |
| १७. श्रीमद्भगवद्गीतायाः सामूहिकपारायणम् । | संपादकः | ३२ |
| १८. ॥ संस्कृतसत्रम् ॥ | संपादकः | ३२ |

अत्र हंसः नलं प्रति कथयति यद् वयं फलेन मूलेन च जीवन-निर्वाहं कुर्मः। तात्पर्यमिदमेव मुनयो निरुपद्रवाः सरलाः साधुभोजना न स्वादुभोजना च भवन्ति। भगवद्गीतायां भगवतोक्तं यथा -

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ श्रीमद्भगवद्गीता-अ.२/५६

मननान्मुनि र्वा अर्थात् प्राप्तस्य ज्ञानस्य मननं करोति। परमात्मनश्चियन्तनं यः करोति स मुनिः। एवं यद्यपि सामान्यरूपेण ऋषि-मुनिपदयोः सामान्यार्थे प्रयोगो दृश्यते परमनयो र्मध्ये पूर्वनिर्दिष्टस्तात्त्विको भेदः।

डॉ.अमृतलालः भोगायता

## श्रीमद्भगवद्गीतायां निर्दिष्टो छात्रोपदेशः।

भारतीय संस्कृतौ सृष्टेः आरम्भात् मनुष्याः ब्रह्मतत्वं विज्ञातुं विविधान् मार्गान् अनुसरन्ति स्म। वेदादारभ्य स्तोत्रसाहित्य पर्यन्तं विविधैः साहित्यभिः ब्रह्मत्वं विज्ञातुं प्रयत्नः कृतः। एतेषु वेदाः, उपनिषदः, दर्शनानि, ब्रह्मसूत्राणि, भगवद्गीता, भागवदादि पुराणानि अपि च विविधैः आचार्यैः रचितानि भाष्याणि च प्रमुखानि वर्तन्ते। किन्त्वेतेष्वपि भाष्यकारैः उपनिषत्, भगवद्गीता, ब्रह्मसूत्राणि च एतानि त्रिणी प्रस्थानत्रयी रूपेण स्वीकृतानि सन्ति। अत्र प्रस्थानं नाम ब्रह्मत्वं विज्ञातुं प्रमाणम्। श्रीमद्वल्लभाचार्येण भागवतमपि चतुर्थ प्रमाणेन स्विकृतमस्ति। तैः लिखितमस्ति यत् -

वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि।
समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टयम् ॥ (तत्वार्थदीप-१)

प्रस्थानत्रयी रूपेण प्रस्थापितानां ग्रन्थानामध्ययनं यथार्थमार्गस्यानुसरणम्। एतेषु त्रीष्वपि ग्रन्थेषु श्रीमद्भगवद्गीता भारतीयसंस्कृतेः संजीवनि विद्यते। साक्षात् भगवतः श्रीकृष्णस्य मुखारविन्दात् निसृतानि अमृतवचनानि जीवनस्य सर्वविधान् मार्गान् उपदिशति। जीवनस्य कमपि क्षेत्रं भवतु श्रीमद्भगवद्गीता सर्वेषां क्षेत्राणामुपदेष्टा वर्तते। गीतादर्पणकारेणोक्तं यत् -

वासुदेवेन गीतायां मनुष्याणां हिताय हि।
कथिता विविधाः विद्या दर्पणे तु प्रधान तः॥ (गीतादर्पणम्-पृ.१११)

गनुष्याणां जीवनशिक्षणस्यारम्भः बाल्यकालाद् भवति। ब्रह्मचर्यवस्थायां प्राप्तं शिक्षणं

समग्रजीवनस्य आधारः विद्यते । अतः छात्रावस्थायामेव सर्वैः छात्रैः भगवद्गीतायाः अध्ययनं कर्तव्यम् । वस्तुतः शिक्षणस्य मुख्यलक्षणम् आत्मानं सुस्कृतं कर्तव्यम् इति वर्तते । विदुषां मतानुसारं शिक्षणेनैव धर्मार्थकाममोक्षाणां चतुर्णां पुरुषार्थाणां प्राप्ति र्भवति । संस्कृतसाहित्येषु श्रीमद्भगवद्गीता जीवनोपयोगीग्रन्थः वर्तते । अर्जुनाद् आरभ्य साम्प्रतकालपर्यन्तं प्रत्येकेन जनेन श्रीमद्भगवद्गीतायाः माध्यमेन स्वकीयप्रश्नानां समाधानं कृतमस्ति । अतः अस्मिन् शोधपत्रे मया श्रीमद्भगवद्गीतायां भगवता कृष्णेन छात्राणां कृते दत्तोपदेशः यथा मति निर्दिष्टुं प्रयत्नः कृतः अस्ति ।

## छात्रोपदेशः :-

वस्तुतः शिक्षणं द्विविधा प्रक्रिया वर्तते । भाषणं श्रवणं च । श्रीमद्भगवद्गीतायां भगवता कृष्णेन संवादप्रक्रिया माध्यमेन अर्जुनाय गुढं तत्वज्ञानमुपदिष्टमस्ति । कुरुक्षेत्रे स्थितः अर्जुनः अपि मूकवत् विद्याग्रहणं न करोति अपि तु मध्ये प्रश्नान् पृष्टवा असौ विद्यायाः उपार्जनं करोति स्म । अर्जुनः स्वमनसि उद्भवितान् संशयान् प्रकटयित्वा स्वसमाधानमकरोत् । अनेनैव वक्तुं शक्यते यत् भगवद्गीता छात्राणां कृते उत्तमां शिक्षणशैलीं शिक्षयमाणः उत्तमः ग्रन्थः विद्यते । भगवता कृष्णेन गीतायां विविधाः विद्याः उपदिष्टाः सन्ति । यथा - आध्यात्मविद्या, ध्यानविद्या, प्राणायमविद्या, लोकव्यवहारविद्या चेत्यादयानां बहुनां विद्यानामुपदेशः सन्निहितः गीतायाम् । किन्तु एतादृशीणां विद्यानां ग्रहणार्थं छात्रैः कथं वर्तितव्यमित्यवश्यमेव ज्ञातव्यं पूर्वम् । अत्र गीतायां प्रोक्तं छात्रोपदेशकथनात् पूर्वं छात्राणां प्रकाराणि बोधयिष्ये । सम्प्रति वयं छात्रः अर्थात् विद्यार्थी (Student) इति मन्यामहे । किन्तु प्राचीनकाले एतेषां छात्राणां चत्वारः प्रकारान्यासन् । शिष्यः, छात्रः, विद्यार्थी, अन्तेवासी च महर्षिणा पाणिनीना एतेषां चतुर्णां कर्मानुगुणं विभाजनं कृतमस्ति ।

(१) शिष्यः :- शासितुं योग्यः शिष्यः। (पा.सू.३/१/१०९) अर्थात् यः विद्यायां योग्यतया शासितुं जानाति सः शिष्योच्यते । प्रायः शिष्ये अनुशासनस्य विशेषः धर्मः भवति । असौ विद्याध्ययनकाले अनुशासनेन विद्यार्जनं करोति । एवमेव गुरुणा दत्तोपदेशस्य पालनमपि करोति ।

(२) छात्रः - गुरोर्दोषाणामावरणं छत्रं तच्छीलमस्य छात्रः। (पा.सू.४/४/६२) अर्थात् यः सदैव अध्ययनैव रतो भवति । न तु गुरोः छिद्रमन्वेषयति । असौ गुरुणा क्वचित् जायमानस्य दोषाणामुपरि छत्रवदावरणं कृत्वा गुरोः कीर्तिमेव तनोति । अध्ययनकाले उद्भवितानां केषांचित प्रश्नानां समाधानं यद्यपि गुरुः तत्कालं कर्तुं न शक्नोति चेत् छात्रः धैर्यपूर्वकेण योग्यकालं प्रतिक्षते । किन्तु कदापि

गुरोः अपप्रचारं नैव करोति।

(३) विद्यार्थी - विद्यामर्थयते तच्छीलः विद्यार्थी। (पा.सू.३/२/७८) अर्थात् यः स्वगुरुं विद्यानिधिं मत्वा विनम्रतया गुरोः विद्यां याचते सः खलु विद्यार्थी। वस्तुतः विद्यायाः अर्जनमेव तस्य मुख्यप्रयोजनम्। असौ विद्यां प्रति उत्कृष्टानुरागी भवति। अपि च गुरु शुश्रुषामपि करोति।

(४) अन्तेवासी - अन्ते गुरोः समीपे वसति तच्छीलः अन्तेवासी। (पा.सू.६/३/१८) अर्थात् यः गुरोः समीपैव उसित्वा विद्याभ्यासं करोति सः अन्तेवासी। अन्तेवासी सदैव गुरुशुश्रुषायां रतो भवति। विद्यार्जनेन सह गुरुशुश्रुषां कृत्वा आश्रमस्य सर्वाणि कार्याण्यपि करोति स्म। शिक्षार्थीष्वन्तेवासी अतीव भाग्यशाली आसीत्।

एवं प्राचीनकाले छात्राणां चत्वारः प्रकाराः आसन्। अधुना विद्यार्थी केवलं परीक्षार्थी एव। अतः एतादृशाणां परीक्षासंवृताणां साम्प्रतछात्राणां कृते भगवद्गीता उत्तमं विद्योपदेशं ददाति। भगवद्गीतायां भगवता कृष्णेन अर्जुनमाध्यमेन छात्रेभ्यः शिक्षणस्य त्रीणि लक्षणानि कथितानि। यथा - तद्विद्धि प्रणिपतेन परिप्रश्नेन सेवया। (भ.गी.४/३४) गीतायाः त्रीणि लक्षणानि छात्राणां त्रीणि रुपाणि प्रकटयति। एतेषु शिष्यः प्रणिपाती। छात्रः परिप्रश्नी। विद्यार्थी च शुश्रुषी भवेत्। विद्याप्राप्त्यर्थं नन्विमनि लक्षणान्यतीववाश्यकानि। किन्तु साम्प्रत काले एतादृशः त्रिलक्षणार्थी छात्रः प्राप्तुं नैव शक्नुमः। साम्प्रतकाले छात्रः एकं यन्त्रवत् विद्यार्जनं करोति। एतादृशाणां छात्राणां कृते भगवद्गीता कर्तव्यकर्मोपदिशति।

**छात्रस्य कर्तव्यम्।**

विद्याप्राप्त्यै छात्रस्य परमकर्तव्यं विद्यते यत् गुरोः शरणागति। यावत् छात्राः शरणागतः न भवति तावत् सः विद्याप्राप्तिमपि कर्तुंन शक्नोति अथवा विद्यायाः अधिकारी न भवति। अर्जुनः यदा शरणागतो भवति तदानीं भगवान् तमुपदिशति यत् -

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसम्मूढचेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्॥ (भ.गी.२/७)

अत्र विद्याप्राप्त्यै अर्जुनस्य शरणागतिः वर्तते। शरणागतं शिष्यमेव गुरुः उपदिशति। भगवता अपि शरणागतमर्जुनमुपदिष्टम् - यत्

ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः।
यज्ज्ञात्वा नेहं भूयोऽन्यज्ज्ञातव्यमवशिष्यते। (भ.गी.७/२)

एवं यावत् शिष्यः गुरोः शरणागतो न भवति तावत् सः विद्योपदेशं प्राप्तुं न शक्नोति। उपनिषत्स्वपि छात्राणां कर्तव्यानि उपदिष्टानि सन्ति। तैत्तिरीयोपनिषदि दिक्षान्तसमारोहे गुरुणा उपदिष्टमस्ति यत् स्वाध्यायान्नप्रमदितव्यम्। यान्यनवविद्यानि कर्माणि तानि तानि सेवितव्यानि

नो इतराणि । ये के चास्मच्छ्रेयांसो ब्राह्मणाः। तेषां त्वयाऽऽसंनेन प्रश्वसितव्यम् । (तैत्ति.उप.१/११) एवमुपनिषदप्युपदिशति यत् विद्याप्राप्त्यै गुरोः सेवा, गुरोः शरणं छात्राणां परमं कर्तव्यम् ।

**छात्राणां ध्येयः।**

विद्याक्षेत्रे छात्राणां ध्येयः उन्नतः भवतु । विद्यार्जनकाले विद्यां विना कोऽपि ध्येयः छात्राणां न भवतु । भगवद्गीतायां भगवता कृष्णेन अर्जुनं विद्यायाः महत्वमुपदिशन् कथितं यत् -

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते । (भ.गी.४/३८)

छात्राणां कृते ज्ञानात् परं पवित्रं श्रेष्ठं च किमपि अपरं तत्वं न हि विद्यते जगत्यस्मिन् । साम्प्रतकाले छात्राः पठन्ति किन्तु तेषां प्रमुखं लक्ष्यमर्थोपार्जनं वर्तते । धनप्राप्त्यार्थमेव पठनम् । वस्तुतः विद्याप्राप्तिः न केवलं धनोपार्जनाय भवतु अपि तु आत्मोन्नत्यार्थमपि भवतु । विद्यारम्भः स्वकर्तव्यकर्मोपदेशादारभ्य कर्मनिवृत्ति पर्यन्तं भवति । अपि च छात्रैः केवल स्वस्य विषयानामध्ययनं न अपि तु यावत् शक्यमितरविषयाणामपि अध्ययनं कर्तव्यम् । भगवद्गीतायां अर्जुनोऽपि भगवतः कृष्णात् सर्वविधा विद्या सहर्षमधिते ।

**विद्यार्जनाय परिश्रमः।**

विद्यार्थी नित्यपरिश्रमी भवेत् । विद्योपार्जनार्थं विद्यार्थीनां सततं श्रमः कर्तव्यः। यतो हि श्रमेणैव विद्या साध्यते । अलसः छात्रः विद्यार्जनं कर्तुं नैव शक्नोति । उक्तमस्ति यत् - अलसस्य कुतो विद्या अविद्यस्य कुतो धनम् । भगवद्गीतायामपि भगवता विद्यायै नित्यं श्रमं कर्तुमुपदिष्टमस्ति । कृष्णः छात्रेभ्यः कथयति यत् -

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः॥ (भ.गी.३/८)

नित्यपरिश्रमोपदेश कथयता भगवता कृष्णेन स्वस्योदाहरणेन उपदिष्टमस्ति यत् -

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन् ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ (भ.गी.३/२२)

यद्यपि भगवताऽपि नित्यकर्म कर्तव्यं भवति तर्हि मनुष्याणां तु कर्तव्यमेव भवति । अतः छात्रैः तु नित्य परिश्रमी सुखस्य त्यागः कर्तव्यः। यतो हि सुखार्थीनः कदापि विद्याप्राप्तिं कर्तुं न शक्नोति । उक्तमस्ति यत् -

सुखार्थी चेत् त्यजेत् विद्यां विद्यार्थी चेत् त्यजेत् सुखम् ।

विद्यार्थी नित्यपरिश्रमी भवेत् तदर्थं भगवता कृष्णेन अर्जुनमाध्यमेन सर्वेभ्यःविद्यार्थीभ्यः

उपदिष्टमस्ति -क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप:। (भ.गी.२/३) एवं विद्यायै नित्यश्रम: कर्तव्यरित्याशयरत्र।

**विद्यायां छात्राणां श्रद्धा ।**

इश्वर: छात्राणामुपदिशति यत् छात्राणां स्वस्य कर्मणि श्रद्धा भवतु विश्वास: भवतु। यतो हि श्रद्धया विना श्रेष्ठविद्याया: प्राप्ति र्न भवति । भगवता गीतायां प्रोक्तं यत् - श्रद्धावान् लभते ज्ञानम् । (भ.गी.४/३९) विद्यार्थीन: स्वस्य कर्मण्यैव न अपि तु स्वस्यगुरो: कर्मणि श्रद्धा धारणीया। यतो हि स्वस्य गुरौ विश्वस्यति तर्हि गुरुरपि छात्रे आत्मविश्वासं जनयिस्यति। यतो हि संशयशील: छात्र: विद्यार्जनं कर्तुं न शक्ष्यति । विषयेऽस्मिन् कथयति यत् - संशयात्मा विनश्यति । (भ.गी.४/४४) भगवद्गीतायां शिष्यत्वेन स्थित: अर्जुनोऽपि स्वगुरौ भगवति कृष्णे श्रद्धां जनयित्वा भाषते यत् - यच्छ्रेय: स्यान्निश्चितं ब्रूहि तन्मे।(भ.गी.२/२७) एवं विद्यापिपासुना विद्यार्थीनां स्वस्मिन् स्वगुरौ च श्रद्धा धरणीया।

**छात्रस्य समर्पणभाव:।**

कस्यचिदपि विषयस्य सिद्धि र्विना समर्पणेन न भवति। विद्यापिपासु: छात्र: सदैव गुरवे समर्पित: भवतु । गुरौ कृता श्रद्धा विना समर्पणेन न फलति । अर्जुन: स्वगुरवे कृष्णाय सम्पूर्णतया समर्पितोऽस्ति । उक्तं गीतायाम् - शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् । (भ.गी.२/७) अस्मात् वचनादारभ्य समर्पितोऽर्जुन: गीताया: अष्टादशतमेऽध्याये गुरवे कृष्णाय निवेदयति यत् - स्थितोऽस्मि गतसन्देह: करिष्ये वचनं तव।(भ.गी.१८/७३) एवमेव अन्यत्रमपि गीतायामर्जुनस्य समर्पणभाव: दृश्यते यथा - पृच्छामि त्वां धर्मसम्मूढ चेता:।(भ.गी.२/७) एतादृशान्यान्यपि वचनानि दृश्यते बहुषु स्थानेषु गीतायाम् । समर्पितस्य शिष्यस्य संशयानपहृत्यमान: गुरुरपि शिष्याय कृष्णवत् कथयति यत् - अहं त्वां सर्वपापेभ्यो मोचयिष्यामि मा शुच:।(भ.गी.२/७) एवं शिष्य: यदा गुरौ समर्पणं प्रदर्शयति तर्हि गुरुरपि शिष्यान् सर्वेभ्य: संकटेभ्य: वारयति इत्यर्थरत्र।

उपसंहृति:।

एवं श्रीमद्भगवद्गीता एतादृशो ग्रन्थोऽस्ति यस्मात् सर्वेषां विषयाणां समाधानं कर्तुं शक्नुम:। गीताया: आरम्भे न योत्स्ये इति भाष्यमाण: महाबलशाली अर्जुनोऽपि भगवत: विद्या उपदेशानन्तरं कथयति यत् - करिष्ये वचनं तव । किन्त्वस्माकं दुर्भाग्यं गणयाम: वा किमपि यत् एतादृशान् श्रेष्ठान् विद्योपदेशग्रन्थान् वयमस्माकं शिक्षणपद्धतौ न प्रयुज्याम:। सम्प्रति अस्माकं शिक्षणप्रणालि मात्र परीक्षालक्षी विद्यते। तद् खलु नोचितम्। विद्याक्षेत्रे विद्यार्थी परीक्षार्थी न अपि तु यथार्थ रुपेण विद्यार्थी भवतु । तदर्थं सर्वेभ्य: छात्रेभ्य: श्रीमद्भगवद्गीताया: अध्ययनमवश्यमेवकरणीयं भविष्यति चेदेव यथार्थ विद्यार्जनं भविष्यति।

- प्रा.डो.एन.एस.शुक्ल

ISSN - 2395-3136
Issue.April-2015

# Academic Discovery Review

-The Refereed International Journal




: Editor :

DR.PRAFUL PANSURIYA

# Index


| Sr. No. | Research Paper/Articles | Author | Page No. |
|---|---|---|---|
| 1 | **Freedom Of Expression: Problems & Perspectives** | Dr. Jagdip U. Nanavaty | 08 |
| 2 | **Through the Prism of Time: Women And The Partition Of India** | Dr. Nitin S. Vyas | 15 |
| 3 | **Prison Reforms and the Indian Supreme Court** | Dr. Kinna T. Chadokia | 20 |
| 4 | ગુજરાતની તસ્વીર અને તાસીર | ડો.(શ્રીમતી) દિના એચ. લોઢીયા | 25 |
| 5 | Useful of Sankrit Subject at presenttime ( Envi'ronment aspect) –વર્તમાન સમયમાં સંસ્કૃતની ઉપયોગિતા(પર્યાવરણ સંદર્ભે) | પ્રા.ગોસ્વામી રૂપેશભારતી આર. | 31 |
| 6 | ઉપનિવેશવાદી આર્થિક નીતિઓ અથવા ઉપનિવેશવાદની (ઈ.સ.૧૭૫૭ થી ૧૯૪૭) | શ્રી શશીકાંત હંસરાજભાઈ ચૌહાણ | 35 |
| 7 | સંસ્કુત સાહિત્યનો શિક્ષણશાસ્ત્ર સાથેનો સંબંધ | ડૉ.પૂણિ મા એ. ત્રિવેદી | 38 |
| 8 | **Faculty development for excellence in highereducation: Issues, challenges & opportunity** | **Prof. J.K.Vasoya** | 42 |
| 9 | માનવ અધિકાર વિશે આટલું જાણીએ. | પ્રો.જે.બી.કુંભાણી | 48 |
| 10 | સેવા ક્ષેત્રનું અભીન્ન અંગ ઈન્ટરનેટ અને તેના અંતર્ગત સાઈબર ક્રાઈમ | પ્રા. સંજય ધાનાણી | 51 |
| 11 | ગુજરાતમાં માનવ વિકાસ આંક ક્ષેત્રે આગેકુચ | પ્રો.જે.બી.કુંભાણી | 53 |
| 12 | સેવાક્ષેત્રે ગ્રાહક સુરક્ષા ધારો | શ્રી મયુર ત્રાડા | 56 |
| 13 | ગ્રાહક સુરક્ષા : આવો જાગૃત થઈએ | ડૉ.પાનસુરિયા પ્રફુલ કે. | 58 |
| 14 | **" પ્લીબાગેનીગ "** | **જયવીર પી. પંડયા** | 62 |
| 15 | E-mail Document is Electronic Evidence Proof ? | Rushikesh Vyas | 65 |
| 16 | रामायणकालिन सन्नायज्ञः। | प्रा.डो.निशिता.एस.शुक्ल | 70 |
| 17 | गुप्त / स्टिंग आपरेशन पर परामश | डॉ. प्रफुल के. पानसूरिया | 75 |
| 18 | **International Financial Reporting Standards** | **Prof.Vinod Movaliya** | 78 |
| 19 | **ગુજરાતનાં સૌરાષ્ટ્ર વિસ્તારમાં જાતિ પ્રમાણ** (Sex Ratio) | **પ્રા. અરવિંદકુમાર પી. મ્યાત્રા** | 83 |
| 20 | **दीलिपस्य गो सेवाव्रतम।** | **प्रा.डॉ.घन याम भोजविया** | 87 |
| 21 | Pharmaceutical Sector in India– An Overview | Sandip K.Parmar | 94 |
| 22 | Corporate Social Responsibility & Business Performance | Mr. Kuldeep H.Jobanputra | 98 |
| 23 | સ્ત્રી સશકિતકરણ અને સમાજ | રસીલા એન. ઉસદડીયા | 107 |

**Academic Discovery Review** ISSN - 2395-3136
-The Refereed International Journal Issue. April-2015

# 16. ❀ रामायणकालिन सन्नार्यः। ❀

प्रा.डो.निशिता.एस.शुक्ल
संस्कृतविभागाध्यक्षा
एम.पी.शाह आर्ट्स एण्ड सायन्स कोलेज
सुरेन्द्रनगरम्

## ❑ प्रास्ताविकम् । ❑

नास्ति वेदसमं शास्त्रं, नास्ति गङ्गासमं तीर्थम् ।
नास्ति सीता तुल्या नारी, नास्ति रामयणात् परम् ।।

रामायणं जगतः आदर्शग्रन्थः। रामायणेन सदृशमपरं शास्त्रं जगति न विद्यते । रामायणे आदर्शपुत्रः, पिता, माता, पतिः, पत्नी, भ्राता, मित्रं, सेवक इत्यादानां निरूपणं वर्तते। अत्र प्रत्येकस्य चारित्र्यं बोधकरं, तत्रापि नारीणां चारित्र्यं विशेषकरम् । सूक्ष्मद्रष्टया पश्यामेत ज्ञायते यत् वैदिककालस्य अपेक्षया रामयणकाले नारीणां स्थितिः दयनीया आसीत् । तासामुपरि पुंसाम् अधिकारः आसीत् । स्वयंवरप्रथा आसीत् किन्तु तत्रापि पितुः अधिकारेवासीत् । बहुपत्नीत्वकारणात् पत्युः उपरि तस्याः सम्पूर्णः अधिकारः न आसीत् । पतिव्रतास्त्रीणामग्निपरीक्षापि कृता । किन्तु एतादृश्यां विषमपरिस्थितौ अपि एताभिः नारीभिः स्वधर्मः, धैर्यः च न त्यक्तः । पतिना त्यक्ता तया अन्याः पुरूषः न काङ्क्षितः अपितु एकाकी जीवनं यापितम् । पत्या, पुत्रेण परिवारेण वा निन्द्यमानया नार्या समराङ्गणे वीराङ्गना भूत्वा पत्युः साहायतापि कृता । एतादृशीणां नारीणां स्मरणेन महापातकस्य नाशो भवति इति विदुषां मतम् ।

अहल्या दौपदी सीता तारा मन्दोदरी तथा ।
पंचकं नाम स्मरेत् नित्यं महापातकनाशयनम् ।।

एवं रामायणकाले नारीणां स्थितिं विज्ञापयितुं मया अत्र प्रयासः कृताः ।

## ❀ रामायणकालिन प्रमुखनार्यः। ❀

### ❖कौशल्या ।

कौशलकुमारी कौशल्या दशरथस्य पट्टराज्ञी आसीत् । व्रतानुष्ठानं, विप्रेभ्यःदानं, साधु–सन्यासीनां सेवा, अतिथिसत्कारः, अहर्निशं भगवद्भक्तित्यादयः तस्याः दैनन्दिनः क्रमः आसीत् । सपत्नीभिः सह तया कदापि इर्ष्यादि भावः न दर्शितः। प्रजानां सुखार्थं तया सदैव यत्नः कृतः । एवं कौशल्या एका उत्तमा पत्नी, माता, श्वश्रुः चेत्यादयरूपेण जीवनं यापितवती । साक्षत् परमात्मनापि तस्याः उदरातैव जन्मलब्धम् ।

Academic Discovery Review ISSN-2395-3136

**❖ सुमित्रा ।**

सुमित्रा दशरथस्य पत्नीसु एका आसीत् । कौशल्यावत् सा अपि परमविदूषी पत्युः सहचारिणी च आसीत् । दशरथस्य तस्यां कैकेयीवत् न स्निह्यति स्म तथापि तया कदापि स्व पातिव्रत्यं न त्यक्तम् । सा उत्तमा माताऽपि आसीत् । रामस्य वनगमनसमये लक्ष्मणेनापि रामेण सह वनं गत्वा रामस्य सेवां कर्तुं नियः कृतः एतदर्थं यदा सः स्वमातुः अनुमतिं स्वीकर्तुं सुमित्रायाः समीपं गतवान् तदा प्राणाधिकप्रियपुत्राय सहर्षमनुमतिं दत्वा तया उक्तम् -

**रामं दशरथं विद्धि मां विद्धि जनकात्मजाम् ।**
**अयोध्यामटकं विद्धि गच्छ तात यथा सुखम् ।।**

एवमुपदिश्य तया उक्तं ''अस्मिन् जगति सा एव पुत्रवती अस्ति यस्याः पुत्रः रामभक्तः अस्ति । अद्य ममापि जीवनं सार्थकमभवत् ।''

**❖ कैकेयी ।**

कैकेयी कैकयनरेशस्य पुत्री आसीत् । दशरथेन तया सह विवाहः कृतः । एषः दशरथस्य अन्तिमविवाहः आसीत् । रूपगुणादिकारणेन दशरथस्य प्रीतिः त्रीसुपत्नीसु कैकेयामधिका आसीत् । बाल्यकालात् तया पितृगृहातैव सर्पविधशिक्षगृहिता । न केवलं शास्त्रविद्यामपितु शस्त्रविद्यामपि सा सम्यक्तया जानाति स्म । सुचारूतया रथचालनमपि तया पठितम् । इन्द्रस्य साहाय्यार्थं शम्बरासुरेण सह योद्धा दशरथः यदा सिद्धः अभवत् तदा सा अपि पतिनासह युद्धं द्रष्टुं गतवती । तस्मिन् युद्धे यदा सारथेः अपि मृत्युः अभवत् तदा कैकेयी कुशलसारथिना सदृशः दशरथस्य प्राणान् रक्षितवती । तस्मिनेव युद्धे द्वितीयवारं यदा रथस्य चक्रधुराभग्ना अभवत् तदानीं तत्क्षणमेव तया तत्र स्वस्कन्धः स्थापितः । एवं द्विवारं तया दशरथस्य प्राणाः रक्षिताः । अनेन कार्येण दशरथेन तस्यै वरद्वयंयाचितुमुक्म् आसीत् । दिनेषु गच्छत्सु तया एकेन वरेण रामस्य चतुर्दश वर्षाणां वनवासः, द्वितीय वरेण भरतस्य कृते राज्यं याचितम् । अनेन वरेण अद्यापि सा हिन्दुसंस्कृतौ तिरस्कृतास्ति । किन्तु विवेचकानां मतानुसारं तया राक्षीसानां संहारार्थं, लोकहितार्थमेव, स्वयं परमात्मनः इच्छानुसारं इदृशं वरद्वयं याचितम् ।

**❖ सीता ।**

सीता विदेहराज जनकसूतारूपेण साक्षात् जगदम्बायाः स्वरूपमासीत् । हिन्दुसंस्कृतौ सीतायाः स्थानमुच्चतरं वर्तते। यद्यपि जनकः सीतां दुर्भिक्षकाले क्षेत्रखननसमये क्षेत्रभूमेः प्राप्तवान् तथापि सर्वासु पुत्रीसु सः सीतायामधिकं स्निह्यति स्म । पिता जनकः परमज्ञानी राजा आसीत् अतः सीताया बाल्यकालेव सर्वाः विद्याः अधिताः । परमात्मना रामेण शिवधनुष्यभङ्गं कृत्वा सीता परिणिता । रामस्य वनगमनसमये तयापि स्वेच्छया वल्कलवस्त्राणि धृत्वा पत्युः सेवार्थं वनगमनस्य निर्णयः कृतः । तस्मिन्समये तया उक्तम् -

**न पिता नात्मजो वात्मा न माता न सखीजनः ।**
**इह प्रेत्य च नारीणां पतिरेको गतिः सदा ।।**

एवं सर्वविधं सुखंक्त्वा तया तृणशय्यायां शयनं कृतम् । पत्रपुष्पफलाम्बुनां भोजनेन दिनानि यापितानि रावणेन अपहृतया सीतया लङ्कायां पातिव्रत्येन दिनानि यापितानि । रावणेन दत्तानामनेकानां प्रलोभनानां त्यागं कृत्वा तया विषमपरिस्थितौ अपि स्वधर्मः न त्यक्तः । पुत्रेण सदृशः हनुमता सह अपि सा न प्रत्यागतवती । अपितु तस्मिन्न समये तया उक्तम् यत् -

**भर्तुर्भक्ति पुरस्कृत्य रामदन्यस्य वानर ।**
**नाहं स्प्रष्टुं पदा गात्रमिच्छेयं वानरोत्तम ।।** (सुं.का. ३५-६२)

Academic Discovery Review ISSN 2395-3136

तथापि चारित्र्य शुद्धयार्थं तया अग्निपरीक्षाऽपि दत्ता । अयोध्यायामपि लोकपवादं दूरी कर्तुं रामेण त्यक्ता सा वाल्मीकिमुनेः आश्रमे वनवासीजीवनं यापितवती । जीवनस्य अन्तकालोऽपि सा चारित्र्यशुद्धेः प्रमाणं दातुं पृथिव्यां प्रविष्टवती । तदर्थं तया उक्तम् –

**मनसा कर्मणा वाचा यथा रामं समर्पये।**
**तथा मे माधवी देवी विपरं दातुमर्हति ।।** (वा.रा. ८/९७/१५)

एवं जीवनस्य अन्तकालपर्यन्तं प्रजाभिः तस्याः परीक्षा कृता ।

### ❖ उर्मिला ।

उर्मिला जनकसूता सीतायाः स्वसा, लक्ष्मणस्यभार्या च आसीत् । इयमपि सीतावत् सर्वगुण सम्पन्नासीत् । सीतायाः चारित्र्यचित्रेण रतः वाल्मीकिना, तुलसीदासेन वा उर्मिलायाः चारित्र्यचित्रणे न्यायः न कृतः इति ज्ञायते अत्र । रामेण सह वनं गन्तुकामं पतिं सा गमनसमये मेलितुं न शक्तवती । तया चिन्तितं यदि अहमपि पतिना सह वनं गमिष्ये तर्हि मे पतिः भ्रातृधर्मात् च्यूतः भविष्यति । मात-पितातुल्य राम-सीतयोः सम्यक् सेवां कर्तुंसमर्थो भविष्यति । तदर्थमेव तया चतुर्दशवर्षाणि पर्यन्तं पत्युः वियोगः स्वीकृतः । सीता तु वनेऽपि पत्युः सेवासुखं प्राप्तवती, किन्तु उर्मिलायाः भाग्ये तु पत्युः वियोगैवागतः । तया सदैव पत्युः रक्षणार्थं पार्वतीमातुः प्रार्थना कृता । तस्याः प्रार्थनयायैव मूर्च्छितः लक्ष्मणः पुनर्जीवितः अभवत् । एवं रामायणे उर्मिलायाः चित्रणमेका त्यागपूर्णा, विरहीणी, पतिव्रता रूपेण च प्राप्यते ।

### ❖ माण्डवी ।

इयं जनकानुज कुशध्वजस्य पुत्री आसीत् । भरतेन सह अस्याः विवाहः संज्ञातः । कैकेय्याः वरदानं श्रुत्वा सा अतीव दुःखमनुभूतवती यतो हि तया चिन्तितं यत् अनेन वरेण स्वस्यपतिरेव कलङ्कितो भविष्यति । कौशल्यादि मयि शङ्कां करिष्यन्ति । एवं चिन्त्यमाना सा स्वस्य वेदनां कामपि वक्तुं न शक्तवती । अनन्तरं भरतेणापि राज्यं त्यक्त्वा नन्दिग्रामे उषितुं निर्णयः कृतः ।

**चतुर्दश हि वर्षाणि जटाचीरधरो ह्यहम् ।**
**फलमूलाशनो वीर भवेयं रघुनन्दन ।**
**तयागमनमाङ्क्षाक्षीन् वसन् वै नगराद्बहिः ।।** (वा.रा. ११२/२३)

एवं माण्डवी अपि उर्मिलावत् चतुर्दशवर्षाणि पत्युः विरहे यापितवती ।

### ❖ श्रुतकीर्तिः ।

श्रुतकीर्तिरपि कुशध्वजस्य पुत्री, माण्डव्याः अनुजा च आसीत् । तस्याः विवाहः शत्रुध्नेन सह अभवत् । श्रुतकीर्ति अयोध्यायामेव निवासं कृत्वा पतिना सह श्वश्रूणां सेवां कृतवती । सीता-उर्मिला, माण्डवीनां च दुःखं दृष्टवा तया अपि चतुर्दशवर्षाणि वेदनायां यापितानि ।

### ❖ सुनयना ।

सुनयना जनकस्य पत्नी आसीत् । सीता तस्याः उदरात् जन्म न लब्धवती तथापि सुनयना सीतायाम् अधिकं स्निह्यति स्म । श्वशूरगृहं गम्यमानाः पुत्रीः सा स्त्रीधर्मं पाठितवती । सा स्वस्य सन्ततिभ्यः उत्तमान् संस्कारान् दत्तवती अतैव सीता, उर्मिलादि सन्नार्यः सर्वासु परिस्थितिसु स्वधर्मं न त्यक्तवत्यः ।

### ❖ अहल्या ।

अहल्या गौतमऋषेः पत्नी आसीत् । सा अतीव सुन्दरी,रूपवती च आसीत् । अनेन इन्द्र अहल्यायाः रूपे मुग्धः अभवत् । एकदा अवसरं प्राप्य तेन छलेन मूनेःरूपं धृत्वा अहल्यया सह पापकर्मआचरितम् । येन कृद्धगौतमः तं शापितवान् । अनन्तरं तेन अहल्यायै

Academic Discovery Review ISSN-2395-3756

शापः दत्तः । अकारणमेव शापितया अहल्या शीलाभूत्वा बहूनि वर्षाणि यापितानि । पात् रामस्य चरणस्पर्शेन तस्योद्धारः अभवत् । एवं अहल्यायाः वृत्तान्तेन ज्ञायते यत् अज्ञाततया कृतापराधस्य उग्रदण्डं प्राप्तवती सा ।

### ❖ शबरी ।

शबरी एका शुद्रनारी आसीत् । दण्डकारण्येव सा मातङ्गऋषेः तस्य शिष्यानां च सेवां करोति स्म । यदा मातङ्गऋषिणा सह शबरी परधाम गन्तुमीष्टवती तदा ऋषिणा उक्तं यत् तव मोक्षः भगवतः रामस्य दर्शनेन भविष्यति । पात् सा रामागमनस्यावधीपर्यन्तंमाश्रमेव दिनानि यापितवती । अनन्तरं रामस्य आतिथ्येन, दर्शनेन च मोक्षगतिं प्राप्तवती । एवम् एका शुद्रा नार्या अनन्या श्रद्धया, भक्त्या च मोक्षः प्राप्तः ।

### ❖ अञ्जना ।

अञ्जना महावीरहनुमतः माता आसीत् । पूर्वजिन्मनि सा पुञ्जिकस्थलीनामा अप्सरा आसीत् । सा बहु चंचला आसीत् अतः दुर्वासामुनिना शापिता सा एतस्मिन् जन्मनि वानरी अभवत् । तस्याः विवाहः वानरराज केशरिणा सह अभवत् । भरद्वाजमुनेः आर्शीर्वचनेन सा रूद्रतुल्य महापराक्रमी पुत्रं प्राप्तवती । सा स्वपुत्रे उत्तमान् संस्कारान् सिंचितवती । अनेनकारणेनैव हनुमान लङ्काविजस्य मुख्याधारः अभवत् । अतैव जनाः अद्यापि हनुमन्तम् अञ्जनीसुतः रूपेण जानन्ति ।

### ❖ तारा ।

तारा किष्किन्धा नरेशवालेः पत्नी आसीत् । वालिना अन्यायेन अनुजसुग्रीवस्य राज्यभागः अपहृतः आसीत् । येन द्वयोर्मध्ये शत्रुता अभवत् । रामस्य साहाय्यं स्वीकृत्य सुग्रीवः यदा वालिं युद्धार्थम् आहूतवान तदा युद्धायगन्तुकामं पतिं तारा वचनानि तेन न श्रृतानि अतैव रामेण बाणेन तस्य वधोऽभवत् । अन्तकाले वालिना पत्न्याः अवगणनायाः पातापः कृतः । सुग्रीवाय कथितं यत्- ''आगते विपत्तिकाले त्वमपि तारायाः हितवचनानि शृणृष्वः यतोहि सा बुद्धिशालीनी राजनीतिज्ञा च अस्ति ।'' अतैव जनैः तस्याः गणना पंचनारीरत्नेषु क्रियते।

### ❖ सरमा ।

सरमा विभीषणस्य पत्नी आसीत् । यदा विभीषणेन रामस्य सेवां कर्तुं निश्चयः कृतः तदा पत्युः मार्गमनुसृत्य सा अपि लङ्कायामेव उषित्वा सीतायाः सेवायां मग्ना अभवत् । अशोकवाटीकायां सा सदैव सीतायै आश्वासनं दत्तवती । तां प्रसन्नं कर्तुं यथायोग्यप्रयत्नं कृतवती ।

### ❖ सुलोचना ।

सुलोचना मेघनादस्य पतिव्रता पत्नी आसीत् । यदा मेघनादस्य वधं कर्तुं लक्ष्मणेन प्रतिज्ञा कृता तदा रामेण उक्तं ''भो लक्ष्मण ! मेघनादस्य शिरः भूमौ न पतेत् तत् त्वया द्रष्टव्यं यतोहि पतिव्रत्याः पत्युः शिरः यदि भमौ पतिष्यति तर्हि अस्माकं सेनानाशोऽपि भविष्यति।'' मेघनादस्य वधानन्तरं पत्युः शिरः स्वीकर्तुं सा आगतवती तदा लक्ष्मणाय तया कथितं ''भो लक्ष्मण
! त्वं गर्वं मा कुरू यतोहि त्वया न हतः मे पतिः अत्र युद्धः पतिव्रत्योः पत्न्योः आसीत् किन्तु मम पतिना रावणस्य पापान्नं भक्षितमासीत् एवं च उर्मिलायाः तपर्या कारणात् एव तव जयः अभवत् ।'' सुलोचनायाः पातिव्रत्यार्थमत्रउक्तं यत् –

**तपनस्तप्यते अत्यन्तं दहनपि हि दह्यते ।**
**कल्पन्ते सर्वतेजांसि दृष्द्वा पतिव्रतं महः ।।**

Academic Discovery Review ISSN-2395-3136

❖ मन्दोदरी ।

मन्दोदरी दानवेन्द्र मयस्य, अप्सरा हेमायाः च पुत्री आसीत् । रावणस्य सा पट्टमहिषी आसीत् । सा अत्यंत बुद्धिशालिनी, राजनीतिज्ञा, पतिव्रता नारी आसीत् । यदा रावणेन सीता अपहृता तदा सा विनयेन रावणायउपदिष्टवती । यत् ''सीता साक्षात् जगदम्बास्ति, रामः विष्णु तेन सह शत्रुतया अस्माकं कुलनाशो भविष्यति ।'' एवं वारं-वारं रावणाय तया उपदिष्टम् । तया सदैव रावणस्य रक्षणार्थं, मङ्गलार्थं च प्रार्थना कृता । मन्दोदर्याः गणनापि पंचसन्नारीसु भवति । यतो हि साहित्यं समाजस्यैव प्रतिबिम्बम् अतैव एतासां नारीपात्राणां परिशीलनेन तत्कालिन समाजजीवने नारीणां स्थितेः ज्ञानं भवति ।

❑ उपसंहृतिः । ❑

कौशल्या, सुमित्रा, मन्दोदरी, तारा सदृश्यः पत्युः कल्याणमभिषिण्यः पतिव्रता राज्ञ्यः । सीता, उर्मिला, माण्डवी, श्रृतकीर्तिः, सुलोचना चेत्यादिन्यः पतिव्रता पत्न्यः विषमपरिस्थितौ अपि स्वकर्तव्यपालनं कृत्वा जीवितुमुपदिशन्ति । हनुमान्, विभिषणः, शबरी, सरमा इत्यादयाः उत्तमाः सेवकाः । सुग्रीवसदृशः उत्तममित्रम्, लक्ष्मणभरतशत्रुघ्नादयः भ्रातरः । एवं रामायणस्य प्रत्येकपात्रं जनान् उत्तमजीवनयापयितुं बाधयन्ति ।

❑ इतिशम् । ❑

➢ सन्दर्भग्रन्थाणां सूची ।


(१) वाल्मीकिरामायणम् - प्रकाशन : ओरिअेन्टलइस्टी, वडोदरा
(२) वाल्मीकिय रामायणाङ्क - प्रकाशन : गीताप्रेस गोरखपुरा
(३) श्री वाल्मीकी रामायण - प्रकाशन : प्रवीण पुस्तक भण्डार, राजकोट
(४) मर्यादा पुरूषोत्तम भगवानाराम जीवन और दर्शन - प्रकाशन : लोकभारती,इलाहाबाद
(५) રામાયણના કેટલાક આદર્શ પાત્રો – પ્રકાશન : ગીતાપ્રેસ ગોરખપુર
(६) नारी-तन-मन गिरवी कब तक - प्रकाशन : साहित्यसंस्थान, गाजियाबाद
(७) बृहत्कोश - प्रकाशन : अक्षरा प्रकाशन, अहमदाबाद (गुजरात)
(८) रूपचन्द्रिका - प्रकाशन : चौखम्बा सुरभारती, वाराणसी
(९) संस्कृत-हिन्दी कोश (आप्टेकोश) - प्रकाशन : न्यु भारतीय बुक कोर्पो. दिल्ही


Academic Discovery Review ISSN-2395-3136